This electronic edition of the *Rāmakṛṣṇavilomakāvya* of Sūryadāsa, typed for the Gauḍīya Grantha Mandira (`www.granthamandira.org`) by Toke Lindegaard Knudsen, is based on the following printed source:

- Rāmakṛṣṇa-viloma-kāvya of Daivajña Śrī Sūrya Paṇḍita with an Auto-Commentary. Edited with the Marmaprakāśikā Hindi Commentary and Introduction by Dr Kāmesvara Nātha Miśra. The Haridas Sanskrit Series 288. Varanasi: The Chowkhamba Sanskrit Series Office, 1970.

Sūryadāsa (1507-1588 CE) was born into a learned family of the *bhāradvājagotra* settled in Pārthaura on the Godāvarī. His father was the well-known astronomer Jñānarāja, who also acted as his teacher. Exceptionally gifted, Sūryadāsa's works include poetry, philosophy, mathematics, astronomy and Vedic exegesis.

The work present here, the *Rāmakṛṣṇavilomakāvya*, shows Sūryadāsa's skill in composing poetry. The second line of each verse consists of the syllables of the first line reversed. The first lines tell the story of the god Rāma, the second ones the story of the god Kṛṣṇa.

Providence, RI, U.S.A.

7 November 2004

दैवज्ञश्रीसूर्यकविविरचितं

# रामकृष्णविलोमकाव्यम्

तं भूतामुक्तिमुदारहासं वन्दे यतो भव्यभवं दया श्रीः ।
श्रीयादवं भव्यभतोयदेवं संहारदामुक्तिमुतासुभूतम् ॥ १॥
चिरं विरञ्चिर्न चिरं विरञ्चिः साकारता सत्यसतारका सा ।
साकारता सत्यसतारका सा चिरं विरञ्चिर्न चिरं विरञ्चिः ॥ २॥
तामसीत्यसति सत्यसीमता माययाक्षमसमक्षयायमा ।
माययाक्षमसमक्षयायमा तामसीत्यसति सत्यसीमता ॥ ३॥
का तापघ्नी तारकाद्या विपापा त्रेधा विद्या नोष्णकृत्यं निवासे ।
सेवा नित्यं कृष्णनोद्या विधात्रे पापाविद्याकारताघ्नी पताका ॥ ४॥
श्रीमतो मध्यमतोदि येन धीरो ऽनिशं वश्यवतीवराद्वा ।
द्वारावतीवश्यवशं निरोधी नयेदितो मध्यमतो ऽमरा श्रीः ॥ ५॥
कौशिके त्रितपसि क्षरव्रती यो ऽददाद्धितनयस्वमातुरम् ।
रन्तुमास्वयन तद्धिदादयो ऽतीव्ररक्षसि पतत्रिकेशिकौ ॥ ६॥
लम्बाधरोरु त्रयलम्बनासे त्वं याहि याहि क्षरमागताज्ञा ।
ज्ञातागमा रक्ष हि याहि या त्वं सेना बलं यत्र रुरोध बालम् ॥ ७॥
लङ्कायना नित्यगमा धवाशा साकं तयानुन्नयमानुकारा ।
राकानुमा यन्ननु यातकंसा शावाधमागत्य निनाय कालम् ॥ ८॥
गाधिजाध्वरवैरा ये ते ऽतीता रक्षसा मताः ।
तामसाक्षरतातीते ये रावैरध्वजाधिगाः ॥ ९॥
तावदेव दया देवे यागे यावदवासना ।
नासवादवया गेया वेदे यादवदेवता ॥ १०॥
सभास्वये भग्नमनेन चापं कीनाशतानद्धरुषा शिलाशैः ।
शैलाशिषारुद्धनताशनाकी पङ्चानने मग्नभये स्वभासः ॥ ११॥
न वेद यामक्षरभामसीतां का तारका विष्णुजिते ऽविवादे ।
देवाविते जिष्णुविकारता का तां सीमभारक्षमयादवेन ॥ १२॥
तीव्रगोरन्वयत्रार्यो वैदेहीमनसो मतः ।
तमसो न महीदेवैर्योत्रायन्वरगोव्रती ॥ १३॥

वेद या पद्मसदनं साधारावततार मा ।
मारता तव राधा सा नन्द सद्मप यादवे ॥ १४ ॥
शैवतो हनने ऽरोधी यो देवेषु नृपोत्सवः ।
वत्सपो नृषु देवे यो धीरो ऽनेन हतो ऽवशैः ॥ १५ ॥
नागोपगो ऽसि क्षर मे पिनाके ऽनायो ऽजने धर्मधनेन दानम् ।
नन्दानेन धर्मधने जयो ना केनापि मे रक्षसि गोपगो नः ॥ १६ ॥
ततान दाम प्रमदा पदाय नेमे रुचामस्वनसुन्दराक्षी ।
क्षीरादसुं न स्वमचारु मेने यदाप दाम प्रमदा नतातः ॥ १७ ॥
तामितो मत्तसूत्रामा शापादेष विगानताम् ।
तां नगाविषदे ऽपाशा मात्रासूत्तमतो मिता ॥ १८ ॥
नासावद्यापत्रपाङ्गाविनोदी धीरो ऽनुत्या सस्मितो ऽद्याविगीत्या ।
त्यागी विद्यातो ऽस्मि सत्यानुरोधी दीनो ऽविङ्गा पात्रपद्मावसाना ॥ १९ ॥
संभावितं भिक्षुरगादगारं याताधिराप स्वनघाजवंशः ।
शवं जघान स्वपराधिताया रङ्गादगारक्षुभितं विभासम् ॥ २० ॥
तयातितारस्वनयागतं मा लोकापवादद्वितयं पिनाके ।
केनापि यं तद्विदवाप कालो मातङ्गयानस्वरतातियातः ॥ २१ ॥
शवे ऽविदा चित्रकुरङ्गमाला पञ्चावटीनर्म न रोचते वा ।
वाते ऽचरो नर्मनटीव चापं लामागरं कुत्रचिदाविवेश ॥ २२ ॥
नेह वा क्षिपसि पक्षिकन्धरा मालिनी स्वमतमत्त दूयते ।
ते यदूत्तमतम स्वनीलिमाराधकं क्षिपसि पक्षिवाहने ॥ २३ ॥
वनान्तयानस्वणुवेदनासु योषामृते ऽरण्यगताविरोधी ।
धीरो ऽवितागरण्यते मृषा यो सुनादवेणुस्वनयातनां वः ॥ २४ ॥
किं नु तोयरसा पम्पा न सेवा नियतेन वै ।
वैनतेयनिवासेन पापं सारयतो नु किम् ॥ २५ ॥
स नतातपहा तेने स्वं शेनाविहितागसम् ।
सङ्गताहिविनाशे स्वं नेतेहाप ततान सः ॥ २६ ॥
कपितालविभागेन योषादो ऽनुनयेन सः ।
स नये न नु दोषायो नगे भाविलतापिकः ॥ २७ ॥
ते सभा प्रकपिवर्णमालिका नाल्पकप्रसरमभ्रकल्पिता ।
ताल्पिकभ्रमरसप्रकल्पना कालिनार्णव पिक प्रभासते ॥ २८ ॥

रावणे ऽक्षिपतनत्रपानते नाल्पकभ्रमणमक्रमातुरम् ।
रन्तुमाक्रमणमभ्रकल्पना तेन पात्रनतपक्षिणे वरा ॥ २९ ॥
दैवे योगे सेवादानं शङ्का नाये लङ्कायाने ।
नेयाकालं येनाकाशं नन्दावासे गेयो वेदैः ॥ ३० ॥
शङ्कावज्ञानुत्त्वनुज्ञावकाशं याने नद्यामुग्रमुद्याननेया ।
याने नद्यामुग्रमुद्याननेया शङ्कावज्ञानुत्त्वनुज्ञावकाशम् ॥ ३१ ॥
वा दिदेश द्विसीतायं यं पाथोयनसेतवे ।
वैतसेन यथोपायं यन्तासीद्विशदे दिवा ॥ ३२ ॥
वायुजो ऽनुमतो नेमे सङ्ग्रामे ऽ रवितो ऽह्नि वः ।
वह्नितो विरमे ग्रासं मेने ऽतो ऽमनुजो युवा ॥ ३३ ॥
क्षताय मा यत्र रघोरितायुरङ्कानुगानन्यवयो ऽयनानि ।
निनाय यो वन्यनगानुकारं युतारिघोरत्रयमायताक्षः ॥ ३४ ॥
तारके रिपुराप श्रीरुचा दाससुतान्वितः ।
तन्वितासु सदाचारु श्रीपरा पुरि के रता ॥ ३५ ॥
लङ्का रङ्कागाराध्यासं याने मेया काराव्यासे ।
सेव्या राका यामे नेया सन्ध्यारागाकारं कालम् ॥ ३६ ॥

इति श्रीदैवज्ञपण्डितसूर्यकविविरचितं विलोमाक्षररामकृष्णकाव्यं समाप्तम्

॥ फिरङ्गिणा तोकाख्येन परोपकारार्थमिदं पुस्तकं लिखितम् । श्रीरस्तु ॥